**श्रोण** पु० श्रोण–अच् । १पङ्गौ अमरः । २काञ्जिके स्त्री ।

**श्रोणि(णी)** स्त्री श्रोण–इन् वा ङीप् । १कटप्राम् अमरः २पथि शब्दर० । [२कटिपार्श्वे ।

**श्रोणिफलक** न० श्रोणिः फलकमिव । १प्रशस्तकटौ हेत० ।

**श्रोणिसूत्र** न० श्रोणौ स्थितं सूत्रम् । श्रोणिस्थे खड्गादि बन्धनसूत्रे ।

**श्रोतस्** न० स्रु–असुन् तुट् च । १कर्णे २नदीवेगे अमरः । ३इन्द्रिये हेमच० । अत्रार्थे दन्त्यादित्वमित्यन्ये ।

**श्रोत्र** न० श्रूयतेऽनेन श्रु–करणे ष्ट्रन् । १शब्दज्ञानसाधने इन्द्रियभेदे अमरः । २तदाधारे गोलके च कर्णशब्दे १७०६पृ० दृश्यम् ।

**श्रोत्रिय** पु० छन्दो वेदमधीते वेत्ति वा छन्दस्+घ श्रोत्रादेशः । १वेदाध्ययनानुरते अमरः । "एकां शाखां सकल्पां वा षड्भिरङ्गैरधीत्य च । षट्कर्मनिरतो विप्रः श्रोत्रियो नाम धर्मवित्" इत्युक्ते २विप्रभेदे "जन्मना ब्राह्मणो ज्ञेयः संस्कारैर्द्विज उच्यते । विद्याभ्यासी भवेद्विप्रः श्रोत्रियस्त्रिभिरुच्यते" मनूक्तलक्षणे ३ब्राह्मणभेदे च ।

**श्रौत** त्रि० श्रुतौ विहितमण् । १वेदविहिते धर्मादौ "श्रौतं कर्म स्वयं कुर्य्यात्" कात्या० स्मृतिः । २गार्हपत्याहवनीयदक्षिणाग्निषु पु० ।

**श्रौत्र** न० श्रोत्र–स्वार्थे अण् । १कर्णे । श्रोत्रियस्य भावः कर्म वा अण् यलोपः । वैदिकस्य भावे "श्रौत्राहन्तीवर्णैर्गुणाय्यैः" सिद्धान्तकौ० ।

**श्रौषट्** अव्य० श्रु–डौषट् । यज्ञादौ हविर्दाने अमरः ।

**श्लक** सर्पणे भ्वा०आ० सक० सेट् इदित् । श्लङ्कते अश्लङ्किष्ट ।

**श्लक्ष्ण** त्रि० श्लिष–क्स्न नि० । १अल्पे अमरः २चिक्कणे । संज्ञायां कन् । ३मनोहरे उणा० ४पूगे राजनि० ।

**श्लक्ष्णत्वच्** पु० श्लक्ष्णा त्वगस्य । अश्मन्तकवृक्षे राजनि० ।

**श्लग** गतौ भ्वा० पर० सक० सेट् इदित् । श्लङ्गति अश्लङ्गीत् ।

**श्लथ** दौर्बल्ये अद०चु०उ०अक०सेट् । श्लथयति ते अशश्लथत् त

**श्लथ** पु० श्लथ–अच् । १विरलसंयोगे शिथिले जटा० २दुर्बले च

**श्लाख** व्याप्तौ भ्वा०पर० सक० सेट् ऋदित् चङि न ह्रस्वः । श्लाखति अशश्लाखीत् । [नि ह्रस्वः । श्लाघते अश्लाघिष्ट ।

**श्लाघ** आत्मगुणाविष्करणे भ्वा० आ० अक० सेट् ऋदित् चङि

**श्लाघा** स्त्री श्लाघ–अ । १प्रशंसायां २परिचर्य्यायाम् ३अभिलाषे च मेदि० । ४निजगुणाविष्करणे ।

**श्लाघ्य** त्रि० श्लाघ–ण्यत् । प्रशस्ये "श्लाघ्यस्त्यक्तुरुत्याग यो: र्दीति" देवीमा० ।

**श्लिकु** न० श्लिष–कु नेत्त्वम् पृषो० । ज्योतिःशास्त्रे उणा० ।

**श्लिक्यु** पु० श्लिष–क्यु नेत्त्वम् पृषो० । १भृत्ये सि०कौ० २जारे उणादि० । [श्लेषीत् ।

**श्लिष** दाहे भ्वा०पर०सक०सेट् उदित् क्त्वा वेट् । श्लेषति अ०

**श्लिष** आलिङ्गने संसर्गे च सक० दि० अनिट् । श्लिष्यति लृदित् अश्लिषत् । आलिङ्गने तु अश्लिक्षत् ।

**श्लिष** श्लेषणे चु०उभ०सक०सेट् । श्लेषयति ते अशिश्लेषत् त ।

**श्लिष्ट** त्रि० श्लिष–क्त । १आलिङ्गिते २संसृष्टे ३श्लेषरूपशब्दालङ्कारयुक्ते शब्दे च ।

**श्लीपद** न० श्रीयुक्तं वृद्धियुक्तं पदमस्मात् पृषो० । (गोद) १रोगभेदे ह्र्व० । २तद्रोगयुक्ते त्रि० शिलीपदशब्दे ५१११ पृ०दृश्यम् ।

**श्लीपदप्रभव** पु० श्लीपदाय रोगभेदाय प्रभवति प्र+भू–अच् । आम्रवृक्षे शब्दमा० । तत्फलसेवने रसवश्यात् तद्वृद्धिः ।

**श्लीपदापह** पु० श्लीपदं रोगभेदमपहन्ति अप+हन–ड । पुत्रजीववृक्षे त्रिका० । [तद्विपरीतो हि अश्लीलः ।

**श्लील** त्रि० श्रीरस्त्यस्य लच् पृषो० रस्य लः । शोभायुक्ते

**श्लेष** पु० श्लिष–घञ् । १संसर्गे अमरः । २दाहे ३आलिङ्गने ४शब्दालङ्कारभेदे च अलङ्कारशब्दे ४०५पृ० दृश्यम् ।

**श्लेषघ्ना** स्त्री श्लेष्माणं हन्ति हन–क टाप् । १मल्लिकायां २केतक्याञ्च विश्वः । ३ज्योतिष्मत्यां जटा० ङीप् । सा च ४मल्लिकायां मेदि० ५त्रिकटुनि शब्दच० ।

**श्लेष्मण** पु० श्लेष्माऽस्त्यस्य न । कफविशिष्टे अमरः ।

**श्लेष्मन्** पु० श्लिष–मनिन् । कफे अमरः । श्लेष्मस्वरूपादिकं भावप्रकाशाद्युक्तं कफशब्दे १६७६पृ० दृश्यम् । तत्प्रकृतिकलक्षणम् "गम्भीरबुद्धिः स्थूलाङ्गः स्निग्धकेशो महाबलः । स्वप्ने जलाशयालोकी श्लेष्मप्रकृतिको नरः" । तत्कर्माणि यथा "स्नेहो बन्धः स्थिरत्वञ्च गौरवं वृषता बलम् । क्षमाधृतिरलोभश्च कफकर्माविकारजम्" । श्लेष्मकरद्रव्याणि कफकरशब्दे १६७७पृ० दृश्यानि । अन्यानि यथा "भोजनानन्तरं स्नानं जलपानं विना तृषा । तिलतैलं स्निग्धतैलं स्निग्धमामलकीद्रवम् । पर्य्युषितान्नं तक्रञ्च पक्वरम्भाफलं दधि । माषाम्बुशर्करातोयं सुस्निग्धस्थलसेवनम् । नारिकेलोदकं स्वच्छस्नानं पर्य्युषितं जलम् । तरत्तुम्बापक्वफलं सुपक्वकर्कटीफलम् । खातस्नानञ्च वर्षासु मूलकं श्लेष्मकारणम् । तज्जलं भ्रमरश्च महावीर्य्यविनाशनम्" । श्लेष्मनाशकद्रव्याणि कफघ्नशब्दे १६७७पृ० दृश्यानि । अन्यानि च यथा "वह्निस्वेद